योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ३०

त्रिंशः सर्गः ३०

श्रीवसिष्ठ उवाच ।

इति तुष्टेषु देवेषु दानवेषु हतेषु च ।

दामव्यालकटा दीना बभूवुर्भयविह्वलाः ।। १

जज्वाल कुपितः क्वेति कल्पान्ताग्निरिव ज्वलन् ।

शम्बरः शमितानीको दामव्यालकटान्प्रति ।। २

शम्बरस्य भयाद्गत्वा पातालमथ सप्तमम् ।

दामव्यालकटास्तस्थुस्त्यक्त्वाथ निजमण्डलम् ।। ३

यमस्य किङ्करा यत्र ये कालत्रासनक्षमाः ।

कुतूहलेन तिष्ठन्ति नरकार्णवपालकाः ।। ४

ते तेषामथ यातानां दत्त्वा भयमभीरवः ।

चिन्ता इव घनाकाराः कुमारीश्च ददुः क्रमात् ।। ५

तैः सार्धं नीतवन्तस्ते तत्र दामादयोऽवधिम् ।

दशवर्षसहस्रान्तमात्तानन्तकुवासनाः ।। ६

इयं मे कामिनी कन्या ममेयं प्रभुतेति च ।

दुरूढस्नेहबन्धानां कालस्तेषां व्यवर्तत ।। ७

धर्मराजोऽथ तं देशं कदाचित्समुपाययौ ।

महानरककार्याणां विचारार्थं यदृच्छया ।। ८

अपरिज्ञातमेनं ते धर्मराजं त्रयोऽसुराः ।

न प्रणेमुर्विनाशाय सामान्यमिव किङ्करम् ।। ९

अथ वैवस्वतेनैते ज्वलितासूग्रभूमिषु ।

विहितभ्रूपरिस्पन्दमात्रेणैव निवेशिताः ।। १०

तत्र ते करुणाक्रन्दाः ससुहृद्दारबन्धवः ।

प्रदग्धाः पर्णविटपा वृक्षा इव वनानिलैः ।। ११

स्वया वासनया जातास्तयैव क्रूरया पुनः ।

बन्धकर्मकराकाराः किराता राजकिङ्कराः ।। १२

तज्जन्माथ परित्यज्य जाताः श्वभ्रेषु वायसाः ।

तदन्ते गृध्रतां यातास्ततोऽपि शुक्लतां गताः ।। १३

सूकरत्वं त्रिगर्तेषु मेषत्वं पर्वतेषु च ।

मगधेष्वथ कीटत्वं बभ्रुस्ते च कुबुद्धयः ।। १४

अनुभूयेतरामन्यां चित्रां योनिपरम्पराम् ।

अद्य मत्स्याः स्थिता राम काश्मीरारण्यपल्वले ।। १५

दावाग्निक्वथिताल्पाल्पपङ्ककल्पाम्बुपायिनः ।

न म्रियन्ते न जीवन्ति जरज्जम्बालजर्जराः ।। १६

विचित्रयोनिसंरम्भमनुभूय पुनःपुनः ।

भूत्वा भूत्वा पुनर्नष्टास्तरङ्गा जलधाविव ।। १७

भवजलधिगतास्ते वासनातन्तुनुन्ना-

स्तृणमिव चिरमूढा देहरूपैस्तरङ्गैः ।

उपशममुपयाता राम नाद्याप्यनन्तं

परिकलय महत्त्वं दारुणं वासनायाः ।। १८

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षोपाये स्थितिप्रकरणे दामव्यालकटजन्मान्तरचित्रवर्णनं नाम त्रिंशः सर्गः

।। ३० ।।